# अमूल्य विद्यते सर्वम।

**अवबोधनम्।**

अ. **एकवाक्येन उत्तरं लिखत।**

*१. बौद्धविहार: **कुत्रासीत्?**

**उत्तर: अवन्तीनगराद् बहि: विशाले रमणीये तपोवने** बौद्धविहार: आसीत्।

*२. **क:** भिक्षूणां पिता?

**उत्तर: भगवान् सुगत:** भिक्षूणां पिता।

*३. भिक्षु: सुगतं प्रति **किमर्थं** गत:?

**उत्तर: भिक्षो: चीवराणि जीर्णानि अत: नूतनचीवराणां कृते प्रार्थयितुं** भिक्षु: सुगतं प्रति गत:।

४. सुगतस्य अनुयायिन: बौद्धविहारे उषित्वा **किं** कुर्वन्ति स्म?

**उत्तर:** सुगतस्य अनुयायिन: बौद्धविहारे उषित्वा **तथागतस्य उपदेशम् अनुसरन्त: भिक्षुव्रतानां पालनं** कुर्वन्ति स्म।

५. तपोवनं **कीदृशै:** वृक्षै: विराजमानम् आसीत्?

**उत्तर:** तपोवनं **पत्रपुष्पफलच्छायायुतै:** वृक्षै: विराजमानम् आसीत्।

६. तपोवनं **कै:** समाश्रितम् आसीत्?

**उत्तर:** तपोवनं **विविधपशुपक्षिभि:** समाश्रितम् आसीत्।

७. तपोवनं **केषां** निवासस्थानम् आसीत्?

**उत्तर:** तपोवनं **तपोधनानाम्** निवासस्थानम् आसीत्।

८. भिक्षु: **कं** प्रति जगाम?

**उत्तर:** भिक्षु: **भगवन्तम्** प्रति जगाम।

**ब. उचितं पर्यायं चित्वा रिक्तस्थानपूर्तिं कुरुत।**

*१. भगवान् सुगत एव _______ पिता।

(माम् / अस्माकम् / मह्यम्)

**उत्तर:** भगवान् सुगत एव **अस्माकं** पिता।

२. _______ बहिरासीत् विशालं रमणीयं तपोवनम्।

(अवन्तीनगरस्य / अवन्तीनगरम् / अवन्तीनगराद्)

**उत्तर: अवन्तीनगराद्** बहिरासीत् विशालं रमणीयं तपोवनम्।

३. _______ समाश्रितं खल्वेतत्तपोवनम्।

(विविधपशुपक्षिभिः / विविधपशुपक्षिणाम् / विविधपशुपक्षिणः)

**उत्तर: विविधपशुपक्षिभिः** समाश्रितं खल्वेतत्तपोवनम्।

४. ते स्वयं _______ प्रति गच्छन्ति स्म।

(भगवन्तः / भगवन्तं / भगवता)

**उत्तर:** ते स्वयं **भगवन्तं** प्रति गच्छन्ति स्म।

**क. कः कं वदति? तद् लिखत।**

१. "मम चीवराणि जीर्णानि।"

**उत्तर: भिक्षुः भगवन्तं वदति।**

२. "प्रार्थये ददातु मे नूतनचीवराणि।"

**उत्तर: भिक्षुः भगवन्तं वदति।**

**ड. सत्यं वा असत्यम् इति लिखत।**

१. धनिकानां निवासस्थानं खल्वेतत्तपोवनम्।

**उत्तर: असत्यम्।**

२. सुगतस्य अनुयायिन: भिक्षुव्रतानां पालनं कुर्वन्ति स्म।

**उत्तर: सत्यम्।**

३. भगवान् स्वयं भिक्षुं प्रति गच्छति स्म।

**उत्तर: असत्यम्।**

**इ. उचितं कारणं चित्वा वाक्यं पुनर्लिखत।**

१. भिक्षव: विविधसमस्यानां निराकरणार्थं स्वयं गौतमबुद्धं प्रति गच्छन्ति स्म। यत: ________

(स: एव अस्माकं पिता इति ते अमन्यन्त। / तत्र तेषां बहव: समस्या: आसन्।)

**उत्तर:** भिक्षव: विविधसमस्यानां निराकरणार्थं स्वयं गौतमबुद्धं प्रति गच्छन्ति स्म। यत: **स: एव अस्माकं पिता इति ते अमन्यन्त।**

२. भिक्षु: नूतनचीवराणि दातुं भगवन्तं प्रार्थयत्। यत: ________

(तदा दीपावलि: आसीत्।/ तस्य चीवराणि जीर्णानि।)

**उत्तर:** भिक्षु: नूतनचीवराणि दातुं भगवन्तं प्रार्थयत्। यत: **तस्य चीवराणि जीर्णानि।**

## पृथक्करणम्।

१. गद्यांशं पठित्वा वृक्षरेखाचित्रं पूरयत।

___१___ बहि:।

↓

विशालं ___२___।

↓

विख्यात: ___३___।


↓

सुगतस्य ___४___।

**उत्तर:** १. **अवन्तीनगराद्** २. **तपोवनम्**

३. **बौद्धविहार:** ४. **अनुयायिन:**

२. गद्यांशे तपोवनस्य वर्णनं पठित्वा जालरेखाचित्रं पूरयत।




उत्तर: १. **अवन्तीनगराद्**

२. **पत्रपुष्पफलच्छायायुतैः**

३. **वृक्षैः**

४. **विविधपशुपक्षिभिः**

५. **तपोधनानां**

## क्रमसंयोजनम्।

**१. अधोदत्तानि वाक्यानि क्रमानुसारं संयोज्य लिखत।**

i. भिक्षुः भगवन्तं प्रणम्य अधोमुखः अतिष्ठत्।

ii. भिक्षुः नूतनचीवराणां कृते प्रार्थितवान्।

iii. भिक्षुः भगवन्तं प्रति जगाम।

iv. भगवता भिक्षुः पृष्टः।

उत्तर: i. **भिक्षुः भगवन्तं प्रति जगाम।**

ii. **भिक्षुः भगवन्तं प्रणम्य अधोमुखः अतिष्ठत्।**

iii. **भगवता भिक्षुः पृष्टः।**

iv. **भिक्षुः नूतनचीवराणां कृते प्रार्थितवान्।**

## शब्दज्ञानम्।

### अ. गद्यांशे पर्यायवाचिशब्दं चिनुत।

*१. ऋषयः, मुनयः, तपस्विनः (तपस्वी लोक) = **तपोधनाः।**

*२. तथागतः, बुद्धः, सर्वज्ञः, धर्मराजः (भगवान बुद्ध) = **सुगतः।**

*३. पुरातनम्, शीर्णम्, प्राचीनम् = **जीर्णम्।**

४. मनोहरम्, रम्यम्, मनोरमम् = **रमणीयम्।**

५. पादपः, तरुः, भूरुहः, महीरुहः = **वृक्षः।**

६. प्रसिद्धः, ख्यातः, प्रथितः, प्रख्यातः, विश्रुतः = **विख्यातः।**

७. उपासकाः, अनुचराः, अनुजीविनः, अनुगाः = **अनुयायिनः।**

८. जनकः, जन्मदाता, तातः (वडील) = **पिता।**

९. भिक्षुकः, श्रमणः, परिव्राजकः = **भिक्षुः।**

१०. नत्वा, वन्दित्वा = **प्रणम्य।**

११. नव, नवीनम् = **नूतनम्।**

### ब. गद्यांशे विलोमपदं चिनुत।

१. कुख्यातः, कुप्रसिद्धः × **विख्यातः।**

२. उन्मुखः × **अधोमुखः।**

३. जीर्णम् × **नूतनम्।**

४. आगच्छन्ति × **गच्छन्ति।**

### क. समूहेतरं पदं चित्वा लिखत।

१. तथागतः तपोधनः, गौतमबुद्धः, सुगतः

**उत्तरः तपोधनः।**

२. भिक्षवः, तपोधनाः, अनुयायिनः, बौद्धविहारः

उत्तर: **बौद्धविहारः।**

३. मे, अतः, स्म, खलु

उत्तर: **मे।**

४. कुर्वन्ति, प्रार्थये, अकथयत्, मन्यन्ते

उत्तर: **अकथयत्।**

५. मन्यन्ते, जगाम, गच्छन्ति, कुर्वन्ति

उत्तर: **जगाम।**

**ड. चतुर्थपदं लिखत।**

१. कोऽपि : कः + अपि :: सोऽतिष्ठत् : ______

उत्तर: कोऽपि : कः + अपि :: सोऽतिष्ठत् : **सः +अतिष्ठत्**

२. अकुर्वन् : कुर्वन्ति स्म :: अगच्छन् : ______

उत्तर: अकुर्वन् : कुर्वन्ति स्म :: अगच्छन् : **गच्छन्ति स्म**

३. सुगत : सुगतस्य :: तथागत : ______

उत्तर: सुगत : सुगतस्य :: तथागत : **तथागतस्य**

४. तपोधन : तपोधनानाम् :: विविधसमस्या : ______

उत्तर: तपोधन : तपोधनानाम् :: विविधसमस्या : **विविधसमस्यानाम्**

इ. धातुसाधित-अव्ययानां चयनम्।

१. गद्यांशे आगते पूर्वकालवाचक-धातुसाधित-अव्यये चित्वा लिखत।

उत्तर: त्वान्त-अव्ययम्-

उषित्वा ।

ल्यबन्त-अव्ययम्-

प्रणम्य।

फ. सन्धिविच्छेदं कुरुत।

*१. खल्वेतत्तपोवनम् = **खलु + एतत् + तपोवनम्।**

* २. तथागतस्योपदेशामृतमनुसरन्त: = **तथागतस्य + उपदेशामृतम् + अनुसरन्त:।**

* ३. युष्माभिर्यत् = **युष्माभि: + यत्।**

४. बहवोऽनुयायिन: = **बहव: + अनुयायिन:।**

५. सोऽतिष्ठत् = **स: +अतिष्ठत्।**

ग. सन्धिं कुरुत।

*१. बहि: + आसीत् = **बहिरासीत्।**

*२. तत्र + उषित्वा = **तत्रोषित्वा।**

*३. आसीत् + एक: = **आसीदेक:।**

४. एव +अस्माकम् = **एवास्माकम्।**

५. क: + अपि = **कोऽपि।**

**ह. विशेष्य-विशेषण – अन्विति:।**

**१. विशेष्य - विशेषणानां मेलनं कुरुत।**

| | **'अ' गट** | | **'ब' गट** |
|---|---|---|---|
| i. | जीर्णानि | अ. | तपोवनम् |
| ii. | रमणीयम् | ब. | बौद्धविहार: |
| iii. | भगवान् | क. | चीवराणि |
| iv. | विख्यात: | ड. | सुगत: |

**उत्तर: i. जीर्णानि चीवराणि।**

**ii. रमणीयं तपोवनम्।**

**iii. भगवान् सुगत:।**

**iv. विख्यात: बौद्धविहार:।**

**२. रिक्तस्थानपूर्तिं कुरुत।**

i. रमणीयं तपोवनम्।

_______ भाषा।

_______ पर्वत:।

**उत्तर:** रमणीयं तपोवनम्।

**रमणीया** भाषा।

**रमणीय:** पर्वत:।

ii. विख्यात: बौद्धविहार:।

_______ पाठशाला।

_______ नाटकम्।

**उत्तर:** विख्यात: बौद्धविहार:।

**विख्याता** पाठशाला।

**विख्यातं** नाटकम्।

iii. चीवराणि जीर्णानि।

________ जीर्णे।

________ जीर्णम्।

उत्तर: चीवराणि जीर्णानि।

**चीवरे** जीर्णे।

**चीवरं** जीर्णम्।

---

## अवबोधनम्।

**अ. एकवाक्येन उत्तरत।**

*१. वस्तुनः उपयोगः **कथं** करणीयः?

**उत्तर: उपभुज्य त्यजत इति विचारं दूरीकृत्य विविधप्रकारैः पुनः पुनः** वस्तुनः उपयोगः करणीयः।

*२. **का** विचारसरणिः अनुसरणीया?

**उत्तर: मा कुरुत अनावश्यकक्रयणमिति** भारतीया विचारसरणिः अनुसरणीया।

३. भिक्षुणा पुरातनचीवराणां **किं** कृतम्?

उत्तर: भिक्षुणा **पुरातनचीवरं शयनीयरूपेण उपयोजितम्।**

४. भिक्षुणा पुरातनमुपधानस्य **किं** कृतम्?

उत्तर: भिक्षुणा **पुरातनमुपधानं पादस्वच्छीकरणाय द्वारे पादपोशी इति स्थापितम्।**

५. भिक्षुणा पुरातनपादपोशिनः सूत्राणि **कस्य** कृते वर्तिरूपेण उपयुज्यन्ते?

**उत्तर:** भिक्षुणा पुरातनपादपोशिनः सूत्राणि **दीपस्य** कृते वर्तिरूपेण उपयुज्यन्ते।

६. भगवता भिक्षवे **कानि** दत्तानि?

**उत्तर:** भगवता भिक्षवे **नूतनचीवराणि** दत्तानि।

**ब. उचितं पर्यायं चित्वा रिक्तस्थानपूर्तिं कुरुत।**

*१. किं कृतं _______ । (तुभ्यम् / त्वया / त्वम्)

**उत्तर:** किं कृतं **त्वया**।

२. _______ रात्रौ तद् उपधानरूपेण गृह्णामीति।

(अहम् / आवाम् / वयम्)

**उत्तर:** **अहं** रात्रौ तद् उपधानरूपेण गृह्णामीति।

३. पुरातनपादपोशिन: सूत्राणि _______ कृते वर्तिरूपेण उपयुज्यन्ते।

(दीपान् / दीपै: / दीपस्य)

**उत्तर:** पुरातनपादपोशिन: सूत्राणि **दीपस्य** कृते वर्तिरूपेण उपयुज्यन्ते।

४. भगवता _______ नूतनचीवराणि दत्तानि।

(तस्मात् / तस्मै / तस्य)

**उत्तर:** भगवता **तस्मै** नूतनचीवराणि दत्तानि।

**क. क: कं वदति? तद् लिखत।**

१. "किं कृतं त्वया पुरातनशयनीयस्य?"

**उत्तर: भगवान् भिक्षुं वदति।**

२. "अहं रात्रौ तद् उपधानरूपेण गृह्णामि।"

**उत्तर: भिक्षु: भगवन्तं वदति।**

३. "कुत्रास्ति ते पुरातनमुपधानम्?"

**उत्तर: भगवान् भिक्षुं वदति।**

४. "पादस्वच्छीकरणाय पादपोशी इति स्थापितम्।"

उत्तर: **भिक्षुः भगवन्तं वदति।**

५. "पुरातनपादपोशिनः सूत्राणि दीपस्य कृते वर्तिरूपेण उपयुज्यन्ते।"

उत्तर: **भिक्षुः भगवन्तं वदति।**

**ड. सत्यं वा असत्यं तद् लिखत।**

१. भिक्षुणा पुरातनचीवरं पादपोशी इति स्थापितम्।

उत्तर: **असत्यम्**।

२. पुरातनमुपधानस्य सूत्राणि वर्तिरूपेण उपयुज्यन्ते।

उत्तर: **असत्यम्**।

३. भगवता तस्मै नूतनचीवराणि दत्तानि।

उत्तर: **सत्यम्**।

४. क्षुद्रवस्तुनः निर्माणे नैसर्गिकसाधनानां आवश्यकता न विद्यते।

उत्तर: **असत्यम्**।

५. येनकेनापि रूपेण वस्तुनः उपयोगः भवत्येव।

उत्तर: **सत्यम्**।

**इ. उचितं कारणं चित्वा वाक्यं पुनर्लिखत।**

१. ________ अत: भिक्षुणा तद् पादपोशी इति स्थापितम्।

(पुरातनमुपधानं जीर्णं जातम् / द्वारात् बहि: मृत्तिका आसीत्)

**उत्तर:** **पुरातनमुपधानं जीर्णं जातम्** अत: भिक्षुणा तद् पादपोशी इति स्थापितम्।

२. भगवता भिक्षवे नूतनचीवराणि दत्तानि। यत: ________

(तस्य समीपे बहूनि चीवराणि आसन्। / पुरातनचीवराणाम् उपयोजनविषये ज्ञात्वा स: प्रसन्न:।)

**उत्तर:** भगवता भिक्षवे नूतनचीवराणि दत्तानि। यत: **पुरातनचीवराणाम् उपयोजनविषये ज्ञात्वा स: प्रसन्न:।**

३. वस्तुवस्तुन: उपयोग: करणीय:। यत: ________

(क्षुद्रवस्तुन: निर्माणेऽपि नैसर्गिकसंसाधनं तथैव मानवीयपरिश्रमा: आवश्यका:। / नूतनवस्तुन: उपलब्धि: न सुलभा।)

**उत्तर:** वस्तुवस्तुन: उपयोग: करणीय:। यत: **क्षुद्रवस्तुन: निर्माणेऽपि नैसर्गिकसंसाधनं तथैव मानवीयपरिश्रमा: आवश्यका:।**

४. उपभुज्य त्यजत इति विचार: दूरीकर्तव्य:। यत: ________

(सर्वाणि वस्तूनि अधुना महार्घाणि जातानि। / वस्तुन: विविधप्रकारै: पुन:पुन: उपयोगं कर्तुं शक्नुम:।)

**उत्तर:** उपभुज्य त्यजत इति विचार: दूरीकर्तव्य:। यत: **वस्तुन: विविधप्रकारै:, पुन:पुन: उपयोगं कर्तुं शक्नुम:।**

## माध्यमभाषया स्वमतप्रकटनम्।

१. 'उपभुज्य त्यजत' इति विचार: योग्य: वा अयोग्य:? एतस्य विषये स्वमतं माध्यमभाषया प्रकटयत।

[टीप- स्वमत अभिव्यक्तीसाठी विचारलेल्या काही प्रश्नांची उत्तरे दोन प्रकारे देता येऊ शकतात, सकारात्मक आणि विरोधात्मक ती दोन प्रकारे कशी लिहिली जाऊ शकतात हे दाखविण्यासाठी आम्ही येथे दोन उत्तरे दिली आहेत.]

**उत्तर:** 'अमूल्यं विद्यते सर्वम्।' ही गौतमबुद्धांची कथा या जगातील प्रत्येक वस्तू उपयुक्त आहे, असा संदेश देते. 'गरजेपेक्षा अधिक खरेदी करू नका' या भारतीय विचारसरणीला ही कथा पुष्टी देते. 'वापरा आणि फेकून द्या' अशी वृत्ती आढळणाऱ्या या काळात 'प्रत्येक वस्तूचा तिच्या अंतापर्यंत पुनरुपयोग करून नैसर्गिक संपदेचे व मानवी परिश्रमांचे रक्षण करणे' आपल्यासाठी हितकारक ठरेल.

प्रस्तुत कथा आपल्याला 'क्षुल्लक वस्तूचा ही तिच्या क्षमतेपर्यंत पूर्ण वापर करावा' ही शिकवण देते. भिक्षूने आपली वस्त्रे जीर्णशीर्ण झाली होती, तरीही त्यांचा त्यांच्या क्षमतेच्या अंतापर्यंत वापर केला. त्याने त्यांचा अंथरूण, उशी नंतर पायपुसणे आणि सर्वात शेवटी दिव्याच्या वाती म्हणून उपयोग केला. यातून हे लक्षात येते की प्रत्येक वस्तूचा जो अपेक्षित विशिष्ट उपयोग आहे, त्यापलीकडेही तिचा अनेकविध प्रकारे वापर होऊ शकतो. आपण आपल्या अभिनव कल्पना योजून त्या वस्तूची अधिकाधिक उपयुक्तता मिळवू शकतो. क्षुल्लक वस्तूच्या निर्मितीसाठीही लागणारी नैसर्गिक साधन-संपत्ती व मानवी परिश्रमांची गरज लक्षात घेऊन प्रत्येकाने त्या वस्तूच्या अंतापर्यंत तिचा वापर केला पाहिजे. वस्तू विकत घेतल्यानंतर केवळ आवडली नाही म्हणून ताबडतोब ती टाकून देणे टाळून आपण त्या परिश्रमांचा मान ठेवावा. तसेच भारतीय विचारसणीप्रमाणे अनावश्यक वस्तूंची खरेदी टाळावी.

अशाप्रकारे 'वापरा आणि फेकून द्या' ही संस्कृती त्यागून आपण नैसर्गिक साधनसंपत्तीचे रक्षण केले पाहिजे आणि घनकचऱ्याची निर्मिती टाळली पाहिजे.

**किंवा**

**उत्तर:** 'अमूल्यं विद्यते सर्वम्।' ही गौतमबुद्धांची कथा 'प्रत्येक गोष्ट उपयुक्त आहे' हा संदेश देते. आणि 'आवश्यकतेपेक्षा अधिक खरेदी करू नये' या भारतीय विचारसरणीला पुष्टी देते.

पाठातील कथा क्षुल्लक वस्तूचाही तिच्या अंतापर्यंत वापर केला पाहिजे. ही शिकवण देते, असे


असले तरी जलदगतीने बदलणाऱ्या आणि विकसित होणाऱ्या या जगात नवनवीन आधुनिक तंत्रज्ञानाच्या व शोधांच्या साहाय्याने आपल्याला स्वत:ला त्या दर्ज्याप्रमाणे राहावे लागते. दररोज विविध क्षेत्रात लागणाऱ्या नवनवीन शोधांमुळे आधुनिक पद्धती व प्रवृत्ती यांत बदल होतो. नवीन उपकरणं विकसित होतात जी लहान आकारात तर असतातच परंतु वेगवान अणि सुलभतर सेवा पुरविणारी असतात. शहरीकरणाचा दुष्परिणाम म्हणजे शहरांतील वाढती लोकसंख्या! त्यामुळे लोकांची घरे लहान व त्यात साठविण्याची जागाही कमी पडते. म्हणून अशा परिस्थितीत जुन्या, मोडकळीस आलेल्या वस्तू टाकून देणेच शहाणपणाचे ठरते. तसेच जागतिकीकरणामुळे ग्राहकाकडे खरेदी करताना अनेक पर्याय असतात आणि म्हणूनच लोक जुन्या वस्तूंच्या बदल्यात नवीन वस्तू घेणे पसंत करतात. तसेच लोक पुनरुपयोगासाठी ज्या वस्तूवर प्रक्रिया केली जाऊ शकते; अशा वस्तू वापरंणे पसंत करतात. तंत्रज्ञानातील मर्यादित प्रगतीमुळे निवासाच्या प्रशस्त जागा, कमी लोकसंख्या इ. मुळे पूर्वी वस्तू तिच्या अंतापर्यंत वापरणे सोयिस्कर होते. परंतु या काळात इतक्या जलदगतीने विकास होत असताना एखाद्या वस्तूचा तिच्या विशिष्ट उपयोगाव्यतिरिक्त इतर कार्यांसाठी तिचा वापर करणे अशक्य आहे.

विकसनशील जगामुळे लोकांच्या गरजा वेगाने बदलत आहेत अशावेळी आपण व्यवहारात 'वापरा आणि फेकून द्या' ही वृत्ती टाळू शकत नाही, असे असताना मात्र या प्रवृत्तीमुळे कचरा निर्माण होणार नाही; तर तो योग्यरित्या पुनरुपयोगासाठी प्रक्रिया करून पुन्हा वापरला जाईल याची मात्र आपण काळजी घेतली पाहिजे.

## पृथक्करणम्।

१. भिक्षुणा कस्य कः उपयोगः कृतः तद् गद्यांशे पठित्वा जालरेखाचित्रे क्रमानुसारं वस्तूनि लिखत।

पादपोशी, शयनीयम्, दीपस्य कृते वर्तिः, उपधानम् पुरातनचीवराणि




**उत्तर:** १. **पुरातनचीवराणि।** २. **शयनीयम्।**
३. **उपधानम्।** ४. **पादपोशी।**
५. **दीपस्य कृते वर्तिः।**

## क्रमसंयोजनम्।

१. **क्रमानुसारं वाक्यानि संयोजयत।**

i. कुत्रास्ति ते पुरातनमुपधानम्?

ii. भगवता तस्मै नूतनचीवराणि दत्तानि।

iii. तद् उपधानरूपेण गृह्णामि।

iv. किं कृतं त्वया पुरातनचीवराणाम्?

उत्तर: **i. किं कृतं त्वया पुरातनचीवराणाम्?**

**ii. तद् उपधानरूपेण गृह्णामि।**

**iii. कुत्रास्ति ते पुरातनमुपधानम्?**

**iv. भगवता तस्मै नूतनचीवराणि दत्तानि।**

## शब्दज्ञानम्।

अ. **गद्यांशे पर्यायशब्दं चिनुत।**

| | | |
|---|---|---|
| *१. | पुरातनम्, शीर्णम् (जुने) | = **जीर्णम्।** |
| २. | रजनी, निशा, निशीथिनी, त्रियामा | = **रात्रिः।** |
| ३. | श्रुत्वा, निशम्य (ऐकून) | = **आकर्ण्य।** |
| ४. | अवदत्, अगदत्, अभाषत, अभणत् (म्हणाला) | = **अवोचत्।** |
| ५. | तन्तुः, रज्जुः, स्यूः (धागा) आणि वचनम्, वाक्यम्, विधिः, (वाक्य) | = **सूत्रम्।** |
| ६. | दीपकः, प्रदीपः, केतुः | = **दीपः।** |
| ७. | प्रयत्नः, श्रमः, उद्योगः, आयासः | = **परिश्रमः।** |
| ८. | मनोहरम्, रमणीयम् | = **चित्ताकर्षकम्।** |
| ९. | चित्तम्, चेतः, मानसम् | = **मनः।** |
| १०. | अनुसरणीया, अनुसर्तव्या | = **अनुकरणीया।** |
| ११. | अनर्घम्, बहुमूल्यम् | = **अमूल्यम्।** |

## ब. गद्यांशे विलोमपदं चिनुत।

| | | | |
|---|---|---|---|
| *१. | नूतनम्, नवीनम् | × | **पुरातनम्।** |
| *२. | विक्रयणम् | × | **क्रयणम्।** (खरेदी) |
| *३. | विनाश: | × | **निर्माणम्।** |
| *४. | निरुपयोग: | × | **उपयोग:।** |
| *५. | अविचार: | × | **विचार।** |
| *६. | अपूर्णता | × | **पूर्णता।** |
| *७. | आवश्यकम् | × | **अनावश्यकम्।** |

## क. भिन्नार्थकशब्दानां ज्ञानम्।

'सूत्रम्' इत्यर्थे तन्तु: (धागा), विधि: (सूत्र) च।

i. सूत्राणि दीपस्य कृते वर्तिरूपेण उपयुज्यन्ते।
एतस्मिन् वाक्ये 'सूत्रम्' इत्युक्ते **तन्तु:**।

ii. गणितशास्त्रे सूत्राणि उपयुज्यन्ते।
एतस्मिन् वाक्ये 'सूत्रम्' इत्युक्ते **विधि:**।

**ड. समूहेतरपदं चित्वा लिखत।**

१. पादपोशी, उपधानम्, नूतनचीवराणि, शयनीयम्

उत्तरः **नूतनचीवराणि।**

२. कथयति, प्रत्युवाच, पप्रच्छ, उवाच

उत्तरः **कथयति।**

३. पृष्टम्, स्थापितम्, गृह्णामि, दत्तानि

उत्तरः **गृह्णामि।**

४. श्रुत्वा, बहिः, क्रीत्वा

उत्तरः **बहिः।**

५. मया, उपभुज्य, दूरीकृत्य, आकर्ण्य

उत्तरः **मया।**

६. स्मर्तव्यम्, अनुकरणीया, सहजतया, कर्तव्यम्

उत्तरः **सहजतया।**

७. त्यजामः, रोचते, गृह्णामि, प्रत्यवदत्

उत्तरः **प्रत्यवदत्।**

इ. **चतुर्थपदं लिखत।**

१. भगवत् : भगवता :: युष्मद् : ______

**उत्तर:** भगवत् : भगवता :: युष्मद् : **त्वया**

२. वच् : उवाच :: प्रच्छ् : ______

**उत्तर:** वच् : उवाच :: प्रच्छ् : **पप्रच्छ**

३. वच् : उवाच :: प्रति +वच् : ______

**उत्तर:** वच् : उवाच :: प्रति +वच् : **प्रत्युवाच**

४. क्री : क्रीत्वा :: श्रु : ______

**उत्तर:** क्री : क्रीत्वा :: श्रु : **श्रुत्वा**

५. आ + कर्ण् : आकर्ण्य :: उप + भुज् : ______

**उत्तर:** आ + कर्ण् : आकर्ण्य :: उप + भुज् : **उपभुज्य**

६. कृ : कुरुत :: त्यज् : ______

**उत्तर:** कृ : कुरुत :: त्यज् : **त्यजत**

७. कृ : कर्तव्यम् :: स्मृ : ______

**उत्तर:** कृ : कर्तव्यम् :: स्मृ : **स्मर्तव्यम्**

फ. **धातुसाधित-अव्ययानां चयनम्।**

१. **गद्यांशे आगतानि पूर्वकालवाचक-धातुसाधित-अव्ययानि चित्वा लिखत।**

**उत्तर: त्वान्त-अव्यये**

i. श्रुत्वा। ii. क्रीत्वा।

**ल्यबन्त-अव्ययानि-**

i. आकर्ण्य। ii. उपभुज्य।

iii. दूरीकृत्य।

## ग. सन्धिविच्छेदं कुरुत।

| | | | |
|---|---|---|---|
| *१. | तच्छुत्वा | = | **तत् + श्रुत्वा।** |
| २. | गृह्णामीति | = | **गृह्णामि + इति।** |
| ३. | मयेति | = | **मया + इति।** |
| ४. | प्राचीनैषा | = | **प्राचीना + एषा।** |
| ५. | निर्माणेऽपि | = | **निर्माणे + अपि।** |
| ६. | भवत्येव | = | **भवति + एव।** |

## ह. सन्धिं कुरुत।

| | | | |
|---|---|---|---|
| १. | शयनीयरूपेण + उपयोजितम् | = | **शयनीयरूपेणोपयोजितम्।** |
| २. | तत् + आकर्ण्य | = | **तदाकर्ण्य।** |
| ३. | कुत्र + अस्ति | = | **कुत्रास्ति।** |
| ४. | स्मर्तव्यम् + इदम् | = | **स्मर्तव्यमिदम्।** |

## ई. विशेष्य-विशेषण – अन्वितिः।

**१. उचितं विशेषणं लिखित्वा रिक्तस्थानपूर्तिं कुरुत।**

i. ________ उपधानम्।

**उत्तर: पुरातनम्** उपधानम्।

ii. प्राचीना कथा।

________ कथे।

________ कथाः।

**उत्तर:** प्राचीना कथा।

**प्राचीने** कथे।

**प्राचीना:** कथा:।

iii. चित्ताकर्षकं वस्तु।

________ वस्तुनी।

________ वस्तूनि।

**उत्तर:** चित्ताकर्षकं वस्तु।

**चित्तकर्षके** वस्तुनी।

**चित्ताकर्षकाणि** वस्तूनि।

iv. अनावश्यकं क्रयणम्।

________ प्रयत्न:।

**उत्तर:** अनावश्यकं क्रयणम्

**अनावश्यक:** प्रयत्न:।

v. भारतीया विचारसरणि:।

________ वेश:।

________ भाषा।

________ भोजनम्।

**उत्तर:** भारतीया विचारसरणि:।

**भारतीय:** वेश:।

**भारतीया** भाषा।

**भारतीयं** भोजनम्।

## सूचनानुसारं परिवर्तनं कुरुत।

*१. भिक्षु: भगवन्तं प्रति जगाम। ('गम्'१ परस्मैपदम् इति धातो: प्रथमभूतकालस्य रूपं प्रयोजयत।)

उत्तर: भिक्षु: भगवन्तं प्रति **अगच्छत्।**

**स्पष्टीकरण** – जगाम = 'गम् → गच्छ्' (१ परस्मैपद),
अभ्यस्त परोक्ष भूतकाळ,
तृतीय पुरुष एकवचन.
∴ गम् → गच्छ् (१ परस्मैपद) प्रथम भूतकाळ,
तृतीय पुरुष एकवचन.
= '**अगच्छत्**'

*२. ते स्वयं भगवन्तं प्रति गच्छन्ति स्म। ('स्म' निष्कासयत।)

**उत्तर**: ते स्वयं भगवन्तं प्रति **अगच्छन्**।

**स्पष्टीकरण** – वर्तमानकाळी क्रियापद + स्म = प्रथम भूतकाळी क्रियापद
∴ काढताना क्रियापदाचे पुरुष व वचन न बदलता त्याचे प्रथम भूतकाळी रूप करावे.
गच्छन्ति = 'गम् → गच्छ्' (१ परस्मैपद) वर्तमानकाळ तृतीय पुरुष बहुवचन.
∴ **अगच्छन्** = 'गम् → गच्छ्' (१ परस्मैपद) प्रथम भूतकाळ तृतीय पुरुष बहुवचन.

*३. भगवता तस्मै नूतनचीवराणि दत्तानि। (प्रयोगपरिवर्तनं कुरुत।)

**उत्तर: भगवान् तस्मै नूतनचीवराणि दत्तवान्।**

**स्पष्टीकरण –**

कर्ता — कर्म — कर्मणि-भू-धा-वि = कर्मणि – प्रयोग:
३ — १ — १
भगवता तस्मै नूतनचीवराणि दत्तानि।
↓ ↓ ↓
भगवान् तस्मै नूतनचीवराणि दत्तवान्।
१ — २ — १
कर्ता — कर्म — कर्तरि-भू-धा-वि = सकर्मक -कर्तरि –प्रयोग:

*४. मम चीवराणि जीर्णानि। (एकवचने लिखत।)

**उत्तर:** मम **चीवरं जीर्णम्।**

**स्पष्टीकरण –**

कर्ता (नाम) — कर्मणि-भू-धा-वि (विशेषणम्)

मम चीवराणि जीर्णानि।

↓ ↓

मम चीवरं जीर्णम्।

नाम (नपुंसकलिङ्गम् प्रथमा एकवचनम्) — विशेषणम् (नपुंसकलिङ्गम् प्रथमा एकवचनम्)

५. भगवत: अनुयायिन: तत्रोषित्वा भिक्षुव्रतानां पालनं कुर्वन्ति स्म। ('स्म' निष्कासयत।)

**उत्तर:** भगवत: अनुयायिन: तत्रोषित्वा भिक्षुव्रतानां पालनम् **अकुर्वन्।**

**स्पष्टीकरण –** वर्तमानकाळ क्रियापद + स्म = प्रथम भूतकाळ क्रियापद

∴ 'स्म' काढताना क्रियापदाचे पुरुष व वचन न बदलता त्याचे प्रथम भूतकाळी रूप करावे.

कुर्वन्ति = 'कृ' (८ उभयपद येथे परस्मैपद) वर्तमानकाळ तृतीय पुरुष बहुवचन.

∴ **अकुर्वन्** = 'कृ' (८ उभयपद येथे परस्मैपद) प्रथम भूतकाळ तृतीय पुरुष बहुवचन.

६. तं प्रणम्य अधोमुख: स: अतिष्ठत्। (पूर्वकालवाचकं निष्कासयत।)

**उत्तर:** स: तं **प्राणमत्** अधोमुख: अतिष्ठत् च।

**स्पष्टीकरण** – वाक्यातील पूर्वकालवाचक अव्यय – 'प्रणम्य'.
'प्रणम्य' तील मूळ धातू ओळखा – 'प्र + नम्' (१ परस्मैपद)
वाक्यातील मुख्य क्रियापदाचे अर्थ पुरुष व वचन ओळखा.
'अतिष्ठत्' प्रथम भूतकाळ तृतीय पुरुष एकवचन.
'प्र + नम्' (१ परस्मैपद) या धातूचे तसेच रूप योजा.– **'प्राणमत्'.**
आवश्यकतेनुसार शब्दांची फेरमांडणी करा.
दुसऱ्या क्रियापदानंतर 'च' अव्यय योजा.

७. तत् चीवरं मया शयनीयरूपेण उपयोजितम्। (प्रयोगपरिवर्तनं कुरुत।)

**उत्तर: तत् चीवरम् अहं शयनीयरूपेण उपयोजितवान्।**

**स्पष्टीकरण** –

| | | | | | |
|---|---|---|---|---|---|
| सर्वनाम | कर्म | कर्ता | | कर्मणि-भू-धा-वि. | = कर्मणि-प्रयोग: |
| १ | १ | ३ | | १ | |
| ↓ | ↓ | ↓ | | ↓ | |
| तत् | चीवरं | मया | शयनीयरूपेण | उपयोजितम्। | |
| ↓ | ↓ | ↓ | | ↓ | |
| तत् | चीवरम् | अहं | शयनीयरूपेण | उपयोजितवान्। | |
| | | ↑ | | ↑ | |
| २ | २ | १ | | १ | |
| सर्वनाम | कर्म | कर्ता | | कर्तरि-भू-धा-वि. | = सकर्मक कर्तरि-प्रयोग: |